## इतश्च लोपः परस्मैपदेषु । (९७/३४२६)

[1]लेटः इत्येव । लेट्सम्बन्धिनः इकारस्य परस्मैपदविषयस्य लोपो भवति । [2]वानुवृत्तेः पक्षे श्रवणमपि भवति । 'जोषिषत्' (ऋ. २.३.५.१) 'तारिषत्' (वा.सं. २३.३२) । मन्दिषत् । न च भवति । 'पताति दिद्युत्' (ऋ. ४. १६. १७) । 'प्रजापतिरुदधिं च्यावयाति' (तै. सं. ३. ५. ५. २) परस्मैपदग्रहणम्, इड्वहिमहिङां मा भूत् ॥

## स उत्तमस्य । (९८/३४२८)

लेटः इति वा इति च वर्तते । लेट्सम्बन्धिन उत्तमपुरुषस्य सकारस्य वा लोपो भवति । करवाव, करवाम । न च भवति । करवावः, करवामः । उत्तमग्रहणम्, पुरुषान्तरे मा भूत् ॥

## नित्यं ङितः । (९९/२२००)

[3]लेटः इति निवृत्तम् । ङितो लकारस्य य [4]उत्तमः, तस्य नित्यं सकारस्य लोपो भवति । अपचाव, अपचाम । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ॥

## इतश्च । (१००/२२०७)

ङितः इत्येव । ङिल्लकारसम्बन्धिन इकारस्य नित्यं लोपो भवति । अपचत् । अपाक्षीत् । परस्मैपदेषु इत्येव, अपचावहि, अपचामहि ॥

## तस्थस्थमिपां तांतंतामः । (१०१/२१९९)

[5]ङितः इत्येव । [6]ङिल्लकारसम्बन्धिनां [7]चतुर्णां यथासङ्ख्यं तामादयः आदेशा भवन्ति । अपचताम् । अपचतम् । अपचत । अपचम् । अपाक्ताम् । अपाक्तम् । अपाक्त । अपाक्षम् ॥

## लिङः सीयुट् । (१०२/२२५७)

लिङादेशानां सीयुडागमो भवति । टकारो देशविध्यर्थः । उकार उच्चारणार्थः । पचेत, पचेयाताम्, पचेरन् । पक्षीष्ट, पक्षीयास्ताम्, पक्षीरन् ॥

## यासुट् परस्मैपदेषूदात्तो ङिच्च । (१०३/२२००)

लिङः इत्येव । परस्मैपदविषयस्य लिङो यासुडागमो भवति, स चोदात्तो [8]भवति ङिच्च । सीयुटोऽपवादः । आगमानुदात्तत्वे प्राप्ते, ङित्त्वं तु लिङ एव विधीयते, तत्र तत्कार्याणां सम्भवाद्, नागमस्य । कुर्यात्, कुर्याताम्, कुर्युः । स्थानिवद्भावादेव लिङादेशस्य ङित्त्वे [9]सिद्धे यासुटो ङिद्वचनं [10]ज्ञापनार्थम्, लकाराश्रयङित्त्वमादेशानां न भवति इति । अचिनवम्[11] । अकरवम् ॥

---

1. वाक्यमिदं नास्ति फ. 2. वेत्यनुवृत्तेः ब. फ. ह. 3. वाक्यमिदं नास्ति ब. 4. उत्तमपुरुषः ब. फ. ह. 5. वाक्यमिदं नास्ति फ. 6. णिल्लकारस्य ह. 7. तस्थस्थमिपां फ, तस्थादीनाम् ह, तसादीनाम् ब. 8. भवति नास्ति फ. ह, ङिच्च नास्ति ब. 9. लब्धे ब. 10. ज्ञापकम् अ. 11. असुनवम् इत्यधिकम् अ. ब. फ.